BSB Bayerische StaatsBibliothek | Münchener DigitalisierungsZentrum
Digitale Bibliothek

Godabole, Paraśurāma Panta

Pāthāvalih Samskrta bhāsecem prathama pustaka

Punem 1863

Signatur: A.or. 3197

Nutzungsbedingungen

Bitte beachten Sie folgende Nutzungsbedingungen:

1. Die Dateien werden Ihnen nur für persönliche, nichtkommerzielle Zwecke zur Verfügung gestellt.
2. Nehmen Sie keine automatisierten Abfragen vor.
3. Nennen Sie die Bayerische Staatsbibliothek als Eigentümerin der Vorlage.
4. Bei der Weiterverwendung sind Sie selbst für die Einhaltung von Rechten Dritter, z. B. Urheberrechten, verantwortlich.

Usage Guidelines

Please observe the following usage guidelines:

1. The files are provided for personal, non-commercial purposes only.
2. Refrain from automated querying.
3. Attribute ownership of the original to the Bavarian State Library.
4. In using the files, it is your own responsibility to observe the rights of third parties, e. g. copyright regulations.

A. Or.
3197.

10250912


A. or.

3197 8°

~~Pathavali~~

Godabole





10250912



10250912

BIBLIOTHECA
REGIA
MONACENSIS

पाठावलिः

संस्कृत भाषेचें प्रथम पुस्तक.

शाळांनील विद्यार्थ्यां करितां

परशु राम पंत तात्या गोडबोले

ह्यांनीं केलें

तें

बाळ कृष्ण रामचंद्र शास्त्रीतकार ह्यांच्या

आपल्या न्यांत छापिलें.

मुकामपुणें

शके १७८५ 1785

इसवी सन १८६३ 1863

किंमत तीन आणे

10250912

अथ बालबोधार्थं संक्षेपतः सूचना लिख्यते.

अत्र मूलवर्णाः षट्चत्वारिंशत् ४६

तत्र स्वरा स्त्रयोदश १३

ह्रस्वस्वराः अ इ उ ऋ ऌ

दीर्घस्वराः { आ ई ऊ ॠ ॡ
ए ऐ ओ औ.

अं अः इत्यनुस्वार विसर्गौ स्वरपरौ भवतः॥

अथ व्यंजनानि अत्रास्मिंश्चात्र १३

क ख ग घ ङ च छ ज झ ञ
ट ठ ड ढ ण त थ द ध न
प फ ब भ म य र ल व
श ष स ह.

जश योगेतः कम योगेषुः

नाम, सर्वनाम, विशेषणं, अव्ययं, क्रियापदं चेति शब्दानां पंच प्रकाराः

नाम सर्वनाम विशेषणानां त्रीणि लिंगानि, त्रीणि वचनानि, सप्त विभक्तयः च विद्यंते.

त्रीणि लिंगानि यथा

पुल्लिंगं, स्त्रीलिंगं, नपुंसकलिंगं चेति.

यथा पटः, पटी, पटं, इत्यादिः,

त्रीणि वचनानि यथा

एकवचनं, द्विवचनं, बहुवचनं चेति.

यथा करः, करौ, कराः इत्यादिः

सप्त विभक्तयः यथा

प्रथमा, द्वितीया, तृतीया, चतुर्थी, पंचमी, षष्ठी, सप्तमी, संबोधनं चेति, संबोधनं प्रथमायाः भेदः

उदाहरणानि

अकारांतः पुंसि रामशब्दः

विभक्तयः	एकवचनं	द्विवचनं	बहुवचनं
प्र०	रामः	रामौ	रामाः
द्वि०	रामं	रामौ	रामान्
तृ०	रामेण	रामाभ्यां	रामैः

च०	रामाय	रामाभ्यां	रामेभ्यः
पं०	रामात्	रामाभ्यां	रामेभ्यः
ष०	रामस्य	रामयोः	रामाणां
स०	रामे	रामयोः	रामेषु
सं०	हे राम	हे रामौ	हे रामाः

आबंतः स्त्रीलिंगः जाया शब्दः

वि भ०	एक व०	द्वि व०	बहु व०
प्र०	जाया	जाये	जायाः
द्वि०	जायां	जाये	जायाः
तृ०	जायया	जायाभ्यां	जायाभिः
च०	जायायै	जायाभ्यां	जायाभ्यः
पं०	जायायाः	जायाभ्यां	जायाभ्यः
ष०	जायायाः	जाययोः	जायानां
स०	जायायां	जाययोः	जायासु
सं०	हे जाये	हे जाये	हे जायाः

अकारांतः नपुंसकलिंगः ज्ञानशब्दः

विभ०	एकव०	द्विव०	बहुव०
प्र०	ज्ञानं	ज्ञाने	ज्ञानानि
द्वि०	ज्ञानं	ज्ञाने	ज्ञानानि
तृ०	ज्ञानेन	ज्ञानाभ्यां	ज्ञानैः
च०	ज्ञानाय	ज्ञानाभ्यां	ज्ञानेभ्यः
पं०	ज्ञानात्	ज्ञानाभ्यां	ज्ञानेभ्यः
ष०	ज्ञानस्य	ज्ञानयोः	ज्ञानानां
स०	ज्ञाने	ज्ञानयोः	ज्ञानेषु
सं०	हे ज्ञान	हे ज्ञाने	हे ज्ञानानि

षट्कारकाणि.

कर्ता, कर्म, करणं, संप्रदानं, अपादानं, अधिकरणं चेति.
प्रथमांतः तृतीयांतो वा कर्ता. द्वितीयांतं प्रथमांतं वा कर्म.
तृतीयांतं करणं. चतुर्थ्यंतं संप्रदानं. पंचम्यंतं अपादानं. स-
प्तम्यंतं अधिकरणं. संबंध मात्रे षष्ठी.

प्रयोगास्त्रिविधाः

कर्तरि प्रयोगः कर्मणि प्रयोगः भावे प्रयोगः इति
कर्तरि प्रयोगः द्विविधः सकर्मकः अकर्मकः इति.

प्रयोगलक्षणं.

यत्र प्रथमांतः कर्ता अकर्मकं क्रियापदं तत्र अकर्मकः कर्तरि प्रयोगः यथा रामस्तिष्ठति.

यत्र प्रथमांतः कर्ता द्वितीयांतं कर्म सकर्मकं क्रियापदं तत्र सकर्मकः कर्तरि प्रयोगः यथा देवदत्तः ग्रामं गच्छति.

यत्र तृतीयांतः कर्ता प्रथमांतं कर्म सकर्मकं क्रियापदं तत्र कर्मणि प्रयोगः यथा मेघेन वृष्टिः क्रियते.

यत्र तृतीयांतः कर्ता अकर्मकं क्रियापदं तत्र भावे प्रयोगः यथा कृष्णेन स्थीयते.

धातुरूपाणि क्रियापदानि.

क्रियापदानां कालपुरुषवचनानि विधंते. कालः त्रिविधः वर्तमानः भूतः भविष्यत् इति पुरुषास्त्रयः प्रथमः मध्यमः उत्तमः इति. वचनानि त्रीणि एकवचनं, द्विवचनं, बहुवचनं चेति.

समासाः षड्विधाः

अव्ययीभावः तत्पुरुषः कर्मधारयः बहुव्रीहिः द्विगुः द्वंद्व इति.

पाठावलिः

पाठः१

सर्वनामशब्दाः

सः	यः	कः	एषा	अहं
तौ	यौ	कौ	इयं	आवां
ते	ये	के	किं	वयं
एषः	अयं	सा	तत्	त्वं
एतौ	इमौ	या	यत्	युवां
एते	इमे	का	एतत्	यूयं

वाक्यानि प्रथमांत शब्द घटितानि.

सः भवति.	यत् आरोहति	एषा पश्यति	आवां गच्छावः
तौ भवतः.	यः अस्ति.	इयं गृण्हाति	वयं गच्छामः
ते भवंति.	यौ स्तः.	तत् पतति.	त्वं वदसि.
एषः चलति.	ये संति.	एतत् दृश्यते.	युवां वदथः
एतौ भ्रमतः.	अयं ब्रूते.	कः करोति.	यूयं वदथ.
एते पठंति.	इमौ ब्रुवाते.	कौ कुरुतः	किं अस्ति.
सा आयाति	इमे ब्रुवते.	के कुर्वंति.	
या गच्छति	का शृणोति.	अहं गच्छामि.	

पाठः २

नाम शब्दाः

ईश्वरः	पिता	वृक्षः	शरीरं
सूर्यः	माता	जलं	गात्रं
वायुः	बालः	घटः	आमयः
अग्निः	कन्या	पर्णं	दंशः
चंद्रः	शिशुः	तरुः	शारवी
भूः	राजा	विद्वान्	बंधनं

वाक्यानि प्रथमांत शब्द घटितानि.

ईश्वरः	जयति.	बालः	क्रूदति.	तरुः	कंपते.
सूर्यः	तपति.	कन्या	रोदिति.	विद्वान्	लिखति.
वायुः	वहति.	शिशुः	क्रीडति.	शरीरं	व्रणति.
अग्निः	ज्वलति.	राजा	भ्राजते.	गात्रं	त्वंगति.
चंद्रः	प्रकाशते.	वृक्षः	स्यंदते.	आमयः	वर्धते.
भूः	भ्रमति.	जलं	सरति.	दंशः	दशति.
पित्ता	मोदते.	घटः	स्यंदते	शारवी	फलति.
माता	ल्हादते.	पर्णं	चलति.	बंधनं	ग्रंथते.

पाठः ३

नाम शब्दाः

उद्योगः	जाया	पुष्पं	नेत्रं
कुंभः	वधूः	तृणं	जिव्हा
वातः	अनलः	नरः	यशाः
पक्षी	अनिलः	नारी	भानुः
समयः	कुसुमं	ग्रहः	इंदुः
मेघः	फलं	नक्षत्रं	चंद्रिका.

वाक्यानि प्रथमांत शब्द घटितानि.

उद्योगः	फलति.	अनलः	दहति.	ग्रहाः	प्रकाशंते.
कुंभः	पूर्यते मया.	अनिलः	वहति.	नक्षत्राणि	स्फुरंति.
वातः	सरति.	कुसुमानि	विकसंति	नेत्रं	स्फुरति.
पक्षी	उड्डीयते.	फलानि	पच्यंते.	जिव्हा	रसते.
समयः	गच्छति.	पुष्पाणि	म्लायंति.	यशाः	प्रसरंति.
मेघः	वर्षति.	तृणानि	रोहंति.	भानुः	उदेति.
जाया	तिष्ठति.	नराः	गच्छंति.	इंदुः	चंद्रति.
वधूः	लज्जति	नार्यः	तिष्ठंति.	चंद्रिका	विराजते.

पाठः ४

नामशब्दाः

जनकः	हस्तः	चौरः	योद्धा
जननी.	पादः	अश्वः	वीरः
क्षुत्	गुरुः	विहंगः	व्याघ्रः
तृट्	शिष्यः	पत्री	सिंहः
लोचनं	बालकः	हरिणः	सूकरः

वाक्यानि प्रथमांत शब्द घटितानि.

जनकः	पुत्रं पुष्णाति.
जननी	रक्षति बालं.
क्षुत्	मां बाधते.
तृट्	मां पीडति.
लोचने	उन्मीलनः.
हस्तौ	व्यापारयतः.
पादौ	धावतः
गुरुः	शिष्यं शिक्षते.
शिष्यः	शालां गच्छति.
बालकौ	क्रीडतः
चौरः	धनं लुंपति.
अश्वाः	रथं वहंति.
विहंगाः	भ्रमंति आकाशे.
पत्रिणः	पतंति अंतरिक्षे.
हरिणाः	पलायंते वने.
योद्धा	संग्रामं गच्छति.
युध्यंते	परस्परं. वीराः
व्याघ्रः	उत्पतति.
सिंहः	गर्जति.
सूकराः	भूमिं उत्खनंति.

पाठः ५

नाम शब्दाः

भूमिः	दंडः	माला	अग्निः
धनं	गुरुः	तक्रं	ओदनं
अन्नं	आत्मा	सुमं	नवनीतं
वाक्यं	जीवनं	सुहृत्	दुग्धं
तुरंगः	भृत्यः	स्वामी	पिता

वाक्यानि द्वितीयांत शब्द घटितानि.

राजा भूमिं पालयति	मालां ग्रंथते मालिकः
धनं याचते भिक्षुः	तक्रं मंथति गोपी.
अन्नं न खादति बालः	सुमं जिघ्रति नारी.
वाक्यं गदति पंडितः	सुहृदं प्रीणाति सुहृत्.
तुरंगं आरोहति राजा.	स्वामिनं द्वेष्टि भृत्यः
स्वामी भृत्यं कुप्यति	अग्निं धमति स्वर्णकारः
दंडं दधते यतिः	ओदनं भुंक्ते बालः
गुरुं सेवते शिष्यः	नवनीतं बुभुक्षति कृष्णः
आत्मानं श्लाघते मूर्खः	दुग्धं पिबति बाला.
जीवनं हरति नारी.	पितरं वंदते पुत्रः

पाठः ६

नाम शब्दाः

तृणं	विश्वं	श्लोकः	श्लोकः
लोकः	पतिः	दिनं	पुत्रः
वृक्षः	चंद्रः	कलापः	बालः
अक्षि	देवः	युद्धं	सः
त्वं	अहं	यः	कः

वाक्यानि द्वितीयांत शब्द घटितानि.

तृणं स्वदते गौः	सर्पः गिलति भेकं
लोकं निंदति मूर्खः	ज्वरी दिनं लंघते.
वृक्षं सेचते नारी.	कलापं कचते कांता.
अक्षिणी अंजनि बाला.	युद्धं यांच्छति वीरः
त्वां अहं कथयामि.	यं पश्यसि सः कः;
ईश्वरः विश्वं अनति.	छात्रः श्लोकं पठति.
पतिं शंकते नारी.	पुत्रं श्लाघते पिता.
चंद्रं लोचते शिशुः	बालं शोचति माता
देवं अर्चति देवलः	तं प्रेषय शीघ्रं.
मां पाहि परमेश्वर.	कं आह्वयसे ?

पाठः७

नाम शब्दाः

पंकः	नलिनी	परिकरः	जालं
वरः	चटकः	मत्स्यः	वाक्
अर्थः	कुंभः	प्रवाहः	पृथ्वी
राजा	गंगा	कांतः	भर्ता
जनः	गौः	शत्रुः	व्याकरणं.

वाक्यानि द्वितीयांत शब्द घटितानि.

कीलः पंकं स्तम्भाति.
वरं वृणोति कन्या.
अर्थं नजानाति श्रोता.
प्रजाः राजानं अभिरज्यंते.
जनं उपदिशति साधुः
गजः नलिनीं दलति.
श्येनः कृणातिन्चटकं
कुंभं करोति कुंभकारः
गंगां अनुवर्ततेदेशः
गां गवेषयति गोपः

कुमारी परिकरं बध्नाति
बकः मत्स्यान् स्निणोति
सेतुः प्रवाहं स्तभ्नोति.
कुमारी कांतं अभिलषते.
राजा शत्रुं जयति.
व्याधः जालं तनोति
वाचं गृणाति वक्ता.
राजा पृथ्वीं रक्षति.
भर्तारं भामयति भामिनी.
व्याकरणं अध्यापयति गुरुः

पाठः ८

नामशब्दाः

तनयः	वृष्टिः	हयः	रथः
वत्सः	पानीयं	दानं	करः
विद्वान्	स्त्री	दासः	शाकं
सुखं	धान्यं	सोमः	वनं
दुःखं	क्षीरं	नदी	पर्वतः

वाक्यानि द्वितीयांत शब्द घटितानि.

पिता	तनयं ब्रूते	हयं	आरोहति सादी.
वत्सान्	पालयंति गोपाः	दानं	ददाति दाता.
विद्वांसं	वंदते जनः	दासं	प्रेषयति स्वामी.
सुखं	विंदते ज्ञानी.	सोमं	पश्यति बालः
दुःखं	अनुभवति पापी.	नदीं	तरति धीवरः
वृष्टिं	करोति मेघः	रथं	आरोहति राजा
पानीयं	पातुं इच्छति पांथः	करं	गृण्हाति भूपः
स्त्रियं	मा अप मानय.	शाकं	पचति बल्लवः
धान्यं	वपति कृषिकः	वनं	गच्छंति तापसाः
क्षीरं	दोग्धि गोपी.	पर्वतं	आरोहंति शत्रवः

पाठः ९

नामशब्दाः

विष्णुः	इक्षुः	रामः	अंगुलिः
तृणं	तिलः	अक्षः	ज्वरः
जलं	वज्रः	पयः	सिंहः
गोमयं	दंडः	रज्ञा	लेखनी
शस्त्रं	पुष्पं	पाणिः	चक्षुः

वाक्यानि तृतीयांत शब्द घटितानि.

विष्णुना प्रपंचः क्रियते	रामेण वाली हतः
जलेन स्कंधयति गात्रं	अक्षैः दीव्यति नारी.
शस्त्रेण सस्यं लुनाति	पयसा पुष्यति वपुः
तृणैः गृहं छादयति	रज्ञा नया कटिं बध्नाति.
गोमयेन भूमिं पुनाति	पाणिना खड्गं स्पृशति वीरः
इक्षुणा धान्यं क्रीणाति	अंगुल्या चंद्रं दर्शयति बाला.
सिक्थैः विनिमयते माषान्	ज्वरेण गात्रं दह्यते.
वचसा सुहृदं प्रीणाति.	सिंहेन मृगः हन्यते.
दंडेन ताडयति वृषभं गोपः	लेखन्या लिखति लेखकः
पुष्पैः देवं महयति भक्तः	चक्षुषा काणः अयं पुरुषः

पाठः१७

नामशब्दाः

बाहुः	फलं	मनः	निद्रा
चरणः	दंतः	बुद्धिः	शरद्
करः	किरणः	कीर्तिः	कष्टः
ओष्ठः	रश्मिः	तमः	पुण्यं
नखं	क्षारः	पयः	लज्जा

वाक्यानि तृतीयांत शब्द घटितानि.

बाहुभ्यां	आलिंगति.	मनसा	ध्यायति हरिं.
चरणाभ्यां	चलति.	बुद्ध्या	निश्चिनोति तत्वं.
कराभ्यां	आकर्षति.	कीर्त्या	जगत् व्याप्यते.
ओष्ठाभ्यां	चुंबति.	तमसा	व्याप्यते गृहं.
नखैः	छिनत्ति पत्रं.	पयसा	क्षपयति क्षिराब्धिं.
फलैः	उदरं भरति.	निद्रया	क्षियते रात्रिः
दंतैः	चर्वति चणकान्	शरदा	प्रसीदंति जलानि.
किरणैः	छादयति महीं	कष्टेन	शरीरं क्षिणोति.
रश्मिभिः	तपति सूर्यः	पुण्येन	लभते यशः
क्षारैः	वर्षति वीरः	लज्जया	अपवर्तते आत्मा.

पाठः११

नामशब्दाः

मणिः	शौर्यं	माता	सुकृतं
वलयं	गजः	पुत्रः	रविः
पंकजं	बलं	अप्र	तंतुः
पूरः	चंदनः	धाता	धूमः
नौः	कस्तूरी	सर्पः	यती

वाक्यानि तृतीयांत शब्द घटितानि.

मणिना	वलयं शोभते.	मात्रा	विना नजीवति बालः
वलयेन	करः विभाति.	पुत्रेण	सह आगतः पिता.
पंकजैः	सरः विराजते.	अद्भिः	वृक्षान् सिंचति.
पूरेण	कूलं विघटितं.	धात्रा	ललाटे लिखितं.
नावा	तरति समुद्रं नाविकः	सर्पेण	दष्टः बालः
शौर्येण	राजते राजा.	सुकृतेन	दृष्टः हरिः
गजैः	भ्राजते सेना.	रविणा	महीप्रकाश्यते.
बलेन	पराभूयते शत्रुः	तंतुभिः	पटः वयते.
चंदनेन	लिंपति गात्रं.	धूमेन	ऊर्ध्वं गम्यते.
कस्तूर्या	तिलकं करोति.	यतिना	संसारः त्यज्यते.

पाठः१२

नामशब्दाः

गोत्रं	रज्जुः	सः	पत्नी
प्रकृतिः	मुसलं	त्वं	भक्तः
श्रमः	स्तेनः	अहं	साधुः
एकः	प्रभुः	अयं	घनः
वेतनं	गुरुः	कः	पवनः

वाक्यानि तृतीयांत शब्द घटितानि.

गोत्रेण गार्ग्यः अयं.	सेन दृष्टं सर्वं.
प्रकृत्या चारुःइयं.	त्वया भुक्तं किं?
श्रमेण तव अलं.	मया इदं उच्यते.
एकेन कृतं सर्वं.	केन उक्तंइदं.
वेतनेन धान्यं लुनाति.	अनेन भणितं.
रज्ज्वा बध्नाति भारं.	पतत्रिभिः कूजितं.
मुसलेन ताडयति गर्दभं.	भक्तेः परिष्टुतः हरिः
स्तेनेन ह्रियते भांडं.	साधुना उपक्रियते जनः
प्रभुणा समर्पितं वस्त्रं.	घनैः मेदुरं नभः दृश्यते.
गुरुणा दत्तं राज्यं सुत्रः भुंक्ते.	पवनेन आहृतः गंधः

पाठः १३

नामशब्दाः

ब्रह्म	ईश्वरः	विप्रः	पुष्पं
देवता	राजा	स्करः	कृष्णः
अग्निः	हरिः	पानं	धाता
यूपः	फलं	यशाः	भृत्यः
रजकः	पतिः	शिष्यः	मित्रः

वाक्यानि चतुर्थ्यंत शब्द घटितानि.

ब्रह्मणे नमः अस्तु.	विप्राय गां ददाति.
देवतायै बलिं हरति.	स्करवाय यतते लोकः
अग्नये हव्यं ददाति.	पाकः पानाय रोहिति.
यूपाय दारु इदं.	यशसे दीपने देहः शूरेण.
रजकाय वस्त्राणि निवेदयति.	शिष्याय शास्त्रं दिशति गुरुः
ईश्वराय नमस्करोमि.	पुष्पेभ्यः स्पृहयति नारी.
राज्ञे स्वस्ति भूयात्.	कृष्णाय श्लाघते गोपी.
हरये रोचते भक्तिः	भृत्याय भृतिं ददाति भर्ता.
फलेभ्यः गच्छति विप्रः	धात्रे शपते दुःखी.
पत्ये पचति नारी.	मित्राय द्रुह्यति नीचः

पाठः १४

नामशब्दाः

जनः	पुण्यं	याचकः	अहं
मुक्तिः	पापं	स्नानं	त्वं
मोक्षः	परः	भोजनं	कः
संसारः	वैद्यः	सुहृत्	यः
ओदनः	पत्नी	माता	सः

वाक्यानि चतुर्थ्यंत शब्द घटितानि.

जनेभ्यः हितं चिंतयति.	याचकाय धनं ददाति
मुक्तये हरिं भजति.	स्नानाय उदकं हरति
ज्ञानं मोक्षाय भवति	भोजनाय त्वरते बालः
अज्ञानं संसाराय भवति	सुहृदे तिष्ठति साधुः
ओदनाय तंडुलाः अपेक्षिताः	मात्रे नमस्करोति.
उपकारः पुण्याय भवति.	मह्यं देहि धनं गुरो.
परपीडनं पापाय भवति	तुभ्यं ददामि किंचित्.
परेभ्यः वर्षति बाणान्.	कस्मै करोषि यत्नं.
वैद्याय हस्तं दर्शयति रोगी.	परस्मै कस्मैचित् देयं.
पत्न्यै निवेदयति वृत्तं पतिः	तस्मै प्रभवति देवदत्तः

पाठः १५

नामशब्दाः

परमेश्वरः	वृक्षः	क्षोभः	दुःसंगः
आदित्यः	मृगेंद्रः	पापं	प्रासादः
विद्युत्	कुंभः	अभ्यासः	अश्वः
पृथ्वी	सरः	अघं	ग्रामः
अंतराळं	कूपः	कुशलं	प्रयत्नः

वाक्यानि पंचम्यंत शब्द घटितानि.

परमेश्वरात् जगत् उत्पन्नं.	देशः क्षोभात् क्षुभ्यते.
आदित्यात् वृष्टिः जायते.	पापात् असते साधुः
विद्युतः अग्निः उत्पद्यते.	अभ्यासात् प्राप्यते ज्ञानं.
पृथिव्याः ओषधयः प्रभवंति.	अघात् जुगुप्सति ज्ञाता.
अंतरालात् विद्युत् पतति.	कुशलात् प्रमाद्यति अज्ञः
वृक्षात् पर्णं गलति.	दुःसंगात् अपसरति सुतः
मृगेंद्रात् बिभ्यति मृगाः	प्रासादात् प्रेक्षते बाला.
कुंभात् जलं श्रोतति.	अश्वात् पतति वीरः
सरसः निष्क्रामति सूकरः	ग्रामात् दूरं गच्छति.
कूपात् जलं उद्धरति नारी.	प्रयत्नात् विरमति.

पाठः १६

नामशब्दाः

आधः	शरीरं	वाडिशं	वचनं
नगरं	आननं	वनं	शापः
शारबी	लोचनं	खलः	सत्संगः
पाषाणः	व्याघ्रः	धीवरः	कामः
गृहं	अश्वः	मृत्युः	क्रोधः

वाक्यानि पंचम्यंत शब्द घटितानि.

व्याधात् बिभेति मृगः	वाडिशात् मत्स्यः मुक्तः
नगरात् आयाति.	वनात् वनांतरं गतः
शारिबिभ्यः स्फरंपांथानां.	खलात् नभयं साधूनां.
पाषाणात् जायते लोहं.	धीवरात् भयं मत्स्यानां.
गृहात् निर्गतः पतिः	मृत्योः भयं सर्वेषां.
शरीरात् घर्मः स्रवते	वचनात् प्रवृत्तिः अनुज्ञानं.
आननात् श्वासः उद्गच्छति.	शापात् मोचनं कदा भवेत्.
लोचनात् अश्रु पतति.	सत्संगात् साधुता खलानां.
बालात् अपि सुभाषितं ग्राह्यं.	कामात् क्रोधः भवति.
अश्वात् स्वरः हीनः	क्रोधात् मोहः जायते.

पाठः १७

नामशब्दाः

जगत्	कुंभः	सागरः	अर्यमा
ईश्वरः	उदकं	मही	गंधः
राजा	कविः	तडित्	अरण्यं
गुरुः	धनी	नृपः	जलधरः
पिता	अर्थः	करः	सीकरः

वाक्यानि षष्ठ्यंतशब्दघटितानि.

जगतः कर्ता ईश्वरः	सागरस्य पारं न गच्छामि.
ईश्वरस्य भक्तिः कार्या.	नद्याः तीरे वृक्षाः संति.
राज्ञः आज्ञां पालयंति नराः	तडितः स्फुरणं दृश्यते.
गुरोः आज्ञा पालनीया.	नृपस्य सभां प्रविशंति नराः
पितुः धनं प्राप्नोति पुत्रः	करस्य भूषणं दानं न वस्त्रं.
कुंभस्य कर्ता कुंभकारः	अर्यम्णः रश्मयः सर्वतः प्रसरंति
उदकस्य रसः मधुरः	गंधस्य वाहको वायुः
कवेः मधुरा वाणी.	अरण्यस्य सरणिं गतः
धनिनः भृत्याः सर्वे.	जलधराणां गर्जना श्रुता.
अर्थस्य सर्वे दासाः	सीकराणां पतनं वृष्टिः

पाठः १८

नाम शब्दाः

अहं	स्नुषः	गंगा	पर्वतः
त्वं	दुहिता	परः	हरिः
माता	सदनं	यमुना	करी
पिता	दधि	चंद्रः	भानुः
पत्नी	वाक्	चमूः	कर्ता

वाक्यानि षष्ठ्यंत शब्द घटितानि.

मम कन्या ते स्नुषा.	गंगायाः रोधसि वृक्षः
तव पुत्रः मम जामाता.	परेषां धनं न ग्राह्यं.
मातुः भ्राता मातुलः	यमुनायाः भ्राता यमः
पितुः भ्राता पितृव्यः	चंद्रस्य बिंबं वर्तुलं.
पत्न्याः भ्राता श्यालः	चम्वाः पतिः सेनानीः
स्नुषस्य भार्या स्नुषा.	पर्वतस्य शिखरं आरोहति.
दुहितुः पतिः जामाता.	हरेः बालः क्रीडति वने.
सदनस्य मंडनं बालः	करिणः पोतः धावति.
दध्नः सारं घृतं.	भानोः बिंबं जले दृश्यते.
वाचः नियमनं मौनं.	कर्तुः इच्छा बली यसी वर्तते.

पाठः १९

नामशब्दाः

मनः	तिलाः	आकाशः	पाषाणः
शिरः	कुसुमं	शाखा	ह्रदः
भांडं	फलं	क्षेत्रं	पत्रं
भूमिः	अक्षिः	जलं	मनः
तरुः	गिरिः	प्रावृट्	हंसः

वाक्यानि समभ्यंतरशब्दघटितानि.

मनसि कार्यं चिंतयति.	आकाशे खगाः भ्रमंति.
शिरसि पुष्पं धारयति बाला.	शाखासु विहंगाः वसंति.
भांडे दुग्धं श्रीणाति नारी.	क्षेत्रे धान्यं वपति.
भूमौ धनं निक्षिपति.	जले रुहंति कमलानि.
तरौ पक्षिणः निवसंति.	प्रावृषि मेघाः उद्यंति.
तिलेषु तैलं विद्यते.	पाषाणे सेतना नास्ति.
कुसुमेषु गंधः वर्तते.	ह्रदे निमज्जति मत्स्याः
फलेषु बीजानि संति.	पत्रेषु लिखंति.
गिरिषु मेघाः संस्थीयंते.	मनसि तुष्यति.
अब्धौ मीनाः बहवः संति.	हस्ते कंदुकं धरति.

पाठः २०

नामशब्दाः

मधु	पादः	धनुः	माता
वक्त्रं	बाहुः	पत्नी	पिता
तुंडं	कटिः	पक्षः	सुहृत्
नेत्रं	भालं	ज्ञानं	पयः
करः	मूर्द्धा	अटवी	वह्निः

वाक्यानि सप्तम्यंत शब्द घटितानि.

मधुनि	माधुर्यं वर्तते.
वक्त्रे	दंताः संति.
तुंडे	जिव्हा चलति.
नेत्रयोः	अंजनं धारयति.
करयोः	कंकणे बिभर्ति.
पादयोः	नूपुरे निनदतः
बाह्वोः	अंगदे शोभेते.
कट्यां	मेखला अस्ति.
भाले	तिलकः दृश्यते.
मूर्द्धि	मुकुटः विद्यते.
धनुषि	बाणं योजयति.
पक्षिषु	श्येनः श्रेष्ठः
पक्षेषु	सिंहः शूरः
शुद्धांते	वसंति नार्यः
अटव्यां	भ्रमंति नराः
मातरि	स्नेहः पुत्रिकायाः
पितरि	लोभः पुत्रस्य.
हृदि	प्रीतिः सज्जनस्य.
पयसि	शैत्यं वर्तते.
वह्नौ	दाहः विद्यते.

पाठः२१

नामशब्दाः

भगवान्	दासी	माता	तातः
रावणः	तनयः	पिता	बालकः
पांथः	जलदः	गुरुः	गंगा
सखा	विद्वान्	बंधुः	शिष्यः
आचार्यः	राजा	मित्रः	मनुजः

वाक्यानि संबोधनशब्दघटितानि.

भो भगवान् मां पालय.	मातः तवदासोस्मि.
रे पांथ इतस्तिष्ठ.	पितः आज्ञां कुरु.
रावण कस्ते गर्वः	गुरो किं अद्य करणीयं
सखे किं ते करवाणि.	बंधो तव सखा अस्मि.
आचार्य त्वां अभिवादये.	मित्र देहिमे प्रतिवचनं.
दासि पानीयं आनय.	तात आस्यतां ममांके.
हे तनय सविनयो भव.	बालक देहिमे चुंबनं.
रे जलद तप्ते मयि वर्ष.	गंगे मां पाहि.
हे विद्वन् देहिमे सदुत्तरं.	शिष्य विद्याभ्यासं कुरु.
भो राजन् वितरय मे धनं.	मनुजाः सतां अनुसरध्वं.

पाठ २२

विशेषणशब्दाः

नील,	पीत,	श्वेत,	शुक्ल,	रक्त,
क्रूर,	शांत,	श्रांत,	उच्च,	नीच,

वाक्यानि विशेषण घटितानि.

पु०	स्त्री०	न०
नीलः पटः	नीला शाटी.	नीलं अंबरं.
पीतः पटः	पीता शाटी.	पीतं वस्त्रं.
श्वेतः अश्वः	श्वेता गौः	श्वेतं उत्तरीयं.
शुक्लः वस्त्रः	शुक्ला वल्गतरी.	शुक्लं वासः
रक्तः कंचुकः	रक्ता कंचुकी.	रक्तं उत्तरीयं.
क्रूरः व्याघ्रः	क्रूरा व्याली.	क्रूरं श्वापदं.
शांतः पुरुषः	शांता नदी.	शांतं मनः
श्रांतः पुमान्	श्रांता स्त्री.	श्रांतं. बालकं.
उच्चः स्वरः	उच्चा वाणी.	उच्चं. वाद्यं.
नीचः स्वरः	नीचा तंत्री.	नीचं. वाद्यं.

पाठः २३

विशेषण शब्दाः

सुंदर,	मंजुल,	विशाल,	पवित्र,	जघन,
श्रेष्ठ,	उत्तम,	मध्यम,	कनिष्ठ,	अधम,

वाक्यानि विशेषण घटितानि.

पु०	स्त्री०	नः
सुंदरः पुरुषः	सुंदरा स्त्री.	सुंदरं बालकं.
मंजुलः शब्दः	मंजुला वाणी.	मंजुलं वाद्यं.
विशालः प्रासादः	विशाला शाला.	विशालं गृहं.
पवित्रः देशः	पवित्रा वाणी.	पवित्रं स्थानं.
जघनः अश्वः	जघना नदी.	जघनं चक्रं.
श्रेष्ठः पुरुषः	श्रेष्ठा स्त्री.	श्रेष्ठं कुलं.
उत्तमः प्रसादः	उत्तमा शाला.	उत्तमं गृहं.
मध्यमः बिंदुः	मध्यमा अंगुलिः	मध्यमं —
कनिष्ठः वर्णः	कनिष्ठा रीतिः	कनिष्ठं —
अधमः पुरुषः	अधमा स्थितिः	अधमं —

पाठः२४

विशेषण शब्दाः

प्रभूत,	प्रचुर,	भाज्य,	विरल,	चंचल,
मंद,	कठोर,	पूर्ण,	समग्र,	कुटिल,
समीप,	अधिक,	लब्ध,	चरम,	शून्य,

वाक्यानि विशेषण घटितानि.

प्रभूतं धनं ददाति राजा ॥ अत्र प्रचुराणि पुष्पाणि विद्यंते ॥ भाज्यं यशः प्राप्नोति विद्वान् ॥ साधवः विरलाः संति ॥ चंचलेन मनसा धावति कामी ॥ अस्य मंदा बुद्धिः ॥ धनी कठोरं वाक्यं गदति ॥ पूर्णोऽयं ते मया किं देयं अस्ति ॥ समग्रस्य शास्त्रस्य अयं निर्णयः ॥ कुटिलेषु नरेषु न विश्वसितव्यं ॥ समीपात् देशात् आगतः ॥ मया लब्धस्य वस्तुनः रक्षणं कार्यं ॥ सुवर्णा इपि अधिका विद्या ॥ चरमे वयसि शरीरं कंपते ॥ शून्ये गृहे न गंतव्यं ॥ ॥

पाठः२५

विशेषण शब्दाः

ग्राम्य,	मधुर,	सकल,	वर्तुल,	वृत्त,
संहत,	शाश्वत,	ध्रुव,	नित्य,	वदान्य,
स्थावर,	जंगम,	सरल,	वक्र,	धन्य,

वाक्यानि विशेषण घटितानि.

ग्राम्यं भाषणं न करोति विद्वान्॥ मधुरया वाचा वशी कृतं मे मनः॥ सकलं शास्त्रं मया न दृष्टं॥ वर्तुलस्य क्षेत्रस्य मध्यः केंद्रं॥ अस्य चक्रं वृत्तौ वर्तते॥ तवशरीरं संहतं अस्ति॥ परमेश्वरः एव शाश्वतः॥ किंचिदपि वस्तु ध्रुवं नास्ति॥ ईश्वरस्य कृतिः नित्या अस्ति॥ स्थावरस्य जंगमस्यच जगतः कर्ता ईश्वरः॥ सरलेन पथागंतव्यं न वक्रेण॥ सएव धन्यः वदान्यः पुरुषः यः लोकहिताय यतते॥

पाठः २६

विशेषणशब्दाः

दयालु,	नवीन,	आर्द्र,	संकीर्ण,	मोघ,
संकुल,	वाम,	दक्षिण,	कोमल,	स्फुट,
विविध,	पुरातन,	भीरु,	स्वतंत्र,	परतंत्र,

वाक्यानि विशेषण घटितानि.

दयालुना गुरुणा अनुग्रहः कृतः॥ इयं नवीना युक्तिः॥ आर्द्रेण वाससा शिरः परि मार्ष्टि॥ वृक्षैः संकीर्णं वनं विशति॥ मोघः यत्नः न कर्तव्यः॥ मेघैः संकुलं नभः॥ दक्षिणेन पाणिना खड्गं वामेन चर्मगृह्णाति॥ अस्य वृक्षस्य कोमलाः पल्लवाः संति॥ स्फुटं अपि वाक्यं न जानासि॥ अस्मिन् वने विविधाः पक्षिणः संति॥ अयंहि पुरातनः धर्मः वर्तते॥ भीरुः पुरुषः रात्रौ बहिः गंतुं न शक्नोति॥ यूयं स्वतंत्राः विद्यध्वे॥ अहं परतंत्रः अस्मि॥

पाठः २७

विशेषणशब्दाः

वाचाल,	नृशंस,	खल,	दीन,	घातुक,
सामान्य,	विशेष,	कुशल,	वत्सल,	शूर,
रुचिर,	सूक्ष्म,	स्थूल,	कृश,	दरिद्र,

वाक्यानि विशेषण घटितानि.

वाचालः पुरुषः कुत्सितं वदति॥ नृशंसः पुरुषः परस्य घातं करोति॥ खलस्य पुरुषस्य संगतिः न कार्या॥ दीनेषु मनुष्येषु दया न कर्तव्या॥ घातुकेन आघ्रेण गृहात् वत्सः अपहृतः॥ अयंहि सामान्यः नियमः॥ इदंतु विशेषं वाक्यं॥ अत्र सर्वे कुशलाः नराः॥ मम माता वत्सला॥ शूरः पुरुषः प्रतिज्ञां न जहाति॥ कन्यायाः रुचिरं रूपं दृष्ट्वा विस्मयंति॥ इदं वस्त्रं सूक्ष्मैः तंतुभिः भूतं॥ गजस्य स्थूलं शरीरं॥ स्त्रियाः कृशं शरीरं॥ दरिद्राणां मनुजानां दैन्यं दूरीकरोति मनुः॥

पाठः २८

विशेषणशब्दाः

शोधित,	चर्वित,	गुंफित,	रक्षित,	वेष्टित,
छादित,	ईप्सित,	भर्जित,	कथित,	घूर्णित,
निष्णात,	निशित,	हृत,	विस्तृत,	कृत,

वाक्यानि विशेषण घटितानि.

इदं पुस्तकं मया शोधितं अस्ति॥ चर्वितं तृणं पुनः चर्वति गौः॥ गुंफिकैः गुंफिता माला॥ राज्ञा रक्षिते नगरे चोराः न वसंति॥ वस्त्रेण वेष्टितं पुस्तकं सुरक्षितं भवति॥ मेघैः छादितः रविः न प्रकाशते॥ तव ईप्सितं फलं दास्यामि॥ भर्जितं धान्यं बीजाय न भवति॥ चारेण कथितं वृत्तं राजा शृण्वाव॥ घूर्णितं स्वामिनं दृष्ट्वा धनं मुषाण तस्करः॥ अयं द्यूत कर्मणि निष्णातः॥ निशितेन खड्गेन आम्रं कृंतति॥ हृतं दुग्धं पिबति बालः॥ विस्तृते गृहे वासः सुखकरः॥ कृतं कर्म अवश्यं भोक्तव्यं॥

पाठः २९

विशेषण शब्दाः

पुष्पित,	ग्रथित,	कथित,	मोषित,	संस्कृत,
अभीष्ट,	छन्न	हृष्ट,	चिह्न,	पुष्ट,
बुभुक्षित,	प्रतिज्ञात,	अंगीकृत,	अतिरिक्त,	पराभूत,

वाक्यानि विशेषण घटितानि.

पुष्पितं वनं आलोक्य कन्या तुतोष ॥ पुष्पैः ग्रथिता वेणी रराज ॥ कथितानि फलानि भक्षयंति ॥ तस्करेण मोषितानि पात्राणि दृष्ट्वा गृहपतिः ॥ विद्वद्भिः संस्कृतः अयं ग्रंथः ॥ यत्ते अभीष्टं तत् वद ॥ तृणैः छन्नः मार्गः न दृश्यते ॥ मित्रं दृष्ट्वा हृष्टं मे मनः ॥ शरेण विद्धः मृगः धावितुं न शक्नोति ॥ पुष्टः देहः परोपकारे योज्यः ॥ बुभुक्षितं पुरुषं न किंचित् प्रतिभाति ॥ प्रतिज्ञातं वाक्यं न त्यजंति शूराः ॥ अंगीकृतं अर्थं पालयंति सत्पुरुषाः ॥ अतिरिक्तं भोजनं न कर्तव्यं ॥ पराभूता सेना पुनः स्थातुं न शक्नोति ॥

पाठः ३०

विशेषण शब्दाः

गुणवत्,	धनवत्,	नीतिमत्,	श्रीमत्,
राजवत्,	ज्ञानवत्,	बुद्धिमत्,	गोमत्,
शक्तिमत्,	वेगवत्,	पुत्रवत्,	धैर्यवत्,

वाक्यानि लिंगत्रये.

पुं०	स्त्री०	नं०
गुणवान् पुरुषः.	गुणवती स्त्री.	गुणवत् अपत्यं.
धनवान् ग्रामः.	धनवती नगरी.	धनवत् गृहं.
नीतिमान् राजा.	नीतिमती भार्या.	नीतिमत् अपत्यं.
श्रीमान् वरः	श्रीमती कन्या.	श्रीमत् कुलं.
राजवान् देशः	राजवती नगरी.	राजवत् मंदिरं.
ज्ञानवान् पुरुषः	ज्ञानवती स्त्री.	ज्ञानवत् अपत्यं.
बुद्धिमान् नरः	बुद्धिमती भार्या.	बुद्धिमत् कुलं.
गोमान् गोष्ठः	गोमती शाला.	गोमत् गृहं.
शक्तिमान् राजा	शक्तिमती सेना.	शक्तिमत् सैन्यं.
वेगवान् नदः	वेगवती नदी.	वेगवत् सलिलं.
पुत्रवान् नरः	पुत्रवती नारी.	पुत्रवत् गृहं.
धैर्यवान् नरः	धैर्यवती नारी.	धैर्यवत् कुलं.

पाठः३१

विशेषणशब्दाः

देही,	दंडी,	कामी,	कोपी,	लोभी,
ज्ञानी,	धनी,	रोगी,	गृही,	मत्सरी,
तेजस्वी,	यशस्वी,	तपस्वी,	मनस्वी,	

वाक्यानि विशेषण घटितानि.

देही नरः देहाभिमानं न त्यजति॥ दंडिनं पुरुषं दृष्ट्वा पशवः पलायंते॥ कामी नरः लोकात् न लज्जति॥ कोपी पुरुषः विचारं नजानाति॥ लोभी पापं अनुसरति॥ ज्ञानी पुमान् अकार्यं न करोति॥ धनी वणिक् वाणिज्यं करोति॥ रोगी नरः पथ्यं भक्षयति॥ गृही पुरुषः कुटुंबं रक्षति॥ मत्सरी परोत्कर्षं न सहते॥ तेजस्विनःपुरुषस्य भयः नभवति क्षते॥ यशस्वी राजा प्रजानांरंजनं करुते॥ तपस्वी ब्राह्मणः तपःतप्तुं वनं प्रविशति॥ मनस्विनःपुरुषस्य कस्यापि अपेक्षा नविद्यते॥

पाठः ३२

विशेषण शब्दाः

तिष्ठत्,	कुर्वत्,	पश्यत्,	गच्छत्,
ददत्,	गृह्णत्,	व्रजत्,	स्पृशत्,
द्रुवत्,	भ्राजत्,	दधत्,	जल्पत्,

वाक्यानि लिंगत्रये.

पु०	स्त्री०	न०
तिष्ठन् पुरुषः.	तिष्ठंती स्त्री.	तिष्ठत् अपत्यं.
कुर्वन् ———	कुर्वती ———	कुर्वत् ———
पश्यन्. ———	पश्यंती ———	पश्यत् ———
गच्छन्. ———	गच्छंती ———	गच्छत् ———
ददत् ———	ददती ———	ददत् ———
गृह्णन् ———	गृह्णती ———	गृह्णत् ———
व्रजन् ———	व्रजंती ———	व्रजत् ———
स्पृशन् ———	स्पृशंती ———	स्पृशत् ———
द्रुवन् ———	द्रुवती ———	द्रुवत् ———
भ्राजन् ———	भ्राजंती ———	भ्राजत् ———
दधन् ———	दधती ———	दधत् ———
जल्पन् ———	जल्पंती ———	जल्पत् ———

पाठः३३

विशेषणशब्दाः

कर्तव्य,	श्रोतव्य,	गंतव्य,	इष्टम,
ग्राह्य,	त्याज्य,	कार्य,	सेव्य,
कृत,	स्थित,	ज्ञात,	दृष्ट,

वाक्यानि विशेषण घटितानि.

कर्तव्यं कर्म आचरेत बुधः॥ गुरोः वाक्यं श्रोतव्यं शिष्येः॥ गुरुणा उपदिष्टं वाक्यं मंतव्यं अस्ति॥ द्रष्टव्या वनशोभा मया दृष्ट॥ गुरोः उपदेशः स्वरेन ग्राह्यः वर्तते॥ हितवचनं त्याज्यं नभवति॥ यः कार्यं कर्म करोति सपंडितः॥ सेव्यो माता पितरौ भजेत्॥ कृतं कर्म अवश्यं भोक्तव्यं॥ ज्ञातं अर्थं न विस्मरति शिष्यः॥ व्याघ्रेण दृष्टः हरिणः धावति दूरं॥

पाठः३४

समासशब्दाः

उपकृष्णं,	अनुरूपं,	यावत्श्लोकं,	आबालं,
यथाशक्ति,	अनुगंगं,	प्रत्यर्थं,	अधिहरि,
प्रत्यग्नि,	अनुवनं,	आमुक्ति,	बहिर्यमं.

वाक्यानि अव्ययी भाव समास घटितानि.

उपकृष्णं गच्छति राधा॥ अनुरूपं वरं वृणोति कन्या॥ यावत् श्लोकं ईश्वरस्य प्रणामाः संति॥ अधिहरि तिष्ठति ब्रह्मांडं॥ यथाशक्ति ददाति देवदत्तः॥ अनुगंगं वाराणसी वर्तते॥ प्रत्यर्थं उपदिशति शिष्यं गुरुः॥ बहिर्वनं संचरंति व्याघ्राः॥ प्रत्यग्नि शलभाः पतंति॥ अनुवनं गतः अशनिः॥ आमुक्ति संसारः तिष्ठति॥ आबालं ईश्वरस्य भक्तिः कर्तव्या॥

पाठः३५

समास शब्दाः

अर्धपिप्पली,	पूर्वकायः,	प्राप्तग्रामः,	कृष्णश्रितः,
मरणापन्नः,	पितृसदृशः,	मधुमिश्रितः	देवबलिः,
लोकहितं,	चौर भयं,	पापभीत;	पितृभक्त;

वाक्यानि तत्पुरुष समास घटितानि.

प्रत्यहं अर्ध पिप्पलीं खादति रोगी॥ तेन पूर्वकायः आनतःकृत; ॥ प्राप्तग्रामः पथिकः विश्राम्यति॥ कृष्णश्रिताः गोपाः तिष्ठंतिगो कुले॥ मरणापन्नं सर्पं काष्ठेन ताडयति बालः॥ पितृसदृशाःपुत्रः क्वचित् दृश्यते॥ मधुमिश्रितं औषधं भक्षयति बालः॥ देवबलिः क्रियते मया॥ लोकहितं करोति स्वराजा॥ अत्र चोरभयं नास्ति॥ यः पापभीतःपुरुषःसः कस्मात् अपि न बिभेति॥ पितृभक्तं नरं स्तुवंति लोकाः॥

पाठः ३६

समास शब्दाः

भूधरः,	भुवन धरः,	राजपुरुषः,	नरपतिः,
कर्म कुशलः,	अक्ष शौंडः,	गुर्वर्था,	देवार्थं,
संमतः,	दुर्जेयं,	पर्यटनं,	कुंभकारः,
ग्रामस्थः,	वनचरः,	अधिपः,	पंकजं,

वाक्यानि तत्पुरुष समास घटितानि.

सर्वे शैलाः भूधराः मेरुरत्र भुवन धरः इत्याहुः॥ राजपुरुषाः सर्वैः संमाननीयाः भवंति॥ नरपतिः प्रजापालनं करोति॥ सः पुरुषः कर्म कुशलः॥ अयंतु अक्षशौंडः विद्यते॥ इयं गुर्वर्था पूजा॥ इदं देवार्थं हविः॥ सर्वेषां संमतः अयं ग्रंथः॥ दुर्जेयं कामं जहि॥ मया पृथिव्यां पर्यटनं कृतं॥ कुंभकारः कुंभान् निर्माति॥ ग्रामस्थाः मनुजाः वनचरेभ्यः अधिकाः ज्ञेयाः॥ लोकानां अधिपः राजा लोकहितं करोति॥ पंकजानां माला कंठे विलसिता॥

पाठः ३७

समास शब्दाः

दूरदर्शी,	उत्तानशयः,	कुपुरुषः,
कोष्णं,	किंसखा,	कदन्नः,
सुमार्गः,	सुजनः,	दुर्जनः,
अब्राह्मणः,	अनड्वान्,	अशकुनं,

वाक्यानि तत्पुरुष समास घटितानि.

पुरुषेण दूरदर्शिना भाव्यं ॥ उत्तान शयं बालकं लालयति माता ॥ दैवं प्रधानं इति कुपुरुषाः वदंति ॥ कोष्णेन जलेन स्नायात् ॥ यः हितं न शास्ति सः किंसखा ॥ कदन्नं आरोग्यात् पञ्चां गमनं वरं ॥ सर्वेषां सुमार्गः दर्शनीयः सुजनैः ॥ दुर्जनानां संगतिः अपि अनर्थाय भवति ॥ अब्राह्मणेभ्यः न ददाति ॥ अनड्वान् न आरोहति ॥ अशकुनं वदति ग्राम्यः ॥

पाठः १८

समासशब्दाः

कृष्णसर्पः,	नीलोत्पलं,	विद्याधनं,
नरसिंहः,	पादपद्मं,	देवबुद्धिः,
त्रिभुवनं,	पुरुषकुंजरः,	घनश्यामः
चतुर्युगं,	स्नातानुलिप्तः,	पंचगवं,

वाक्यानि तत्पुरुष समास घटितानि.

रे शिशो अयं नील मणीनां हारः नतु कृष्णसर्पः किं बिभेषि ॥ अस्मिन् सरसि नीलोत्पलानि बहूनि विद्यंते ॥ सर्वेषु धनेषु विद्या धनं श्रेष्ठं ॥ हे नरसिंह ते पादपद्मं प्रणतः अस्मि ॥ पाषाणे देवबुद्धिः न कार्या ॥ त्रिभुवनस्य कर्ता परमेश्वरः अस्ति ॥ पुरुष कुंजरं घनश्यामं रामं वंदे ॥ सहस्राणि चतुर्युगानि ब्रह्मणः एकं दिनं भवति इति आहुः ॥ स्नातानुलिप्तं बालं भोजयति माता ॥ पंचगवं पाल्यते मया ॥

पाठः ३१

समास शब्दाः

आर्त दुःखः,	जित कामः,	जित क्रोधः,
उपहृत पत्रः,	उद्धृतौदना,	पीतांबरः,
चक्र पाणिः,	पद्म नेत्रः,	एक ग्रामाः,
वीर पुरुषः,	चारु भूषणा,	मृग नयना,

वाक्यानि बहुव्रीहि समास घटितानि.

हे दयालो आर्तदुःखं मां त्राहि॥ यः साधुः सः जित कामः जित क्रोधश्च वर्तते॥ उपहृत पत्रं रुद्रं नमस्करोति भक्तः॥ उद्धृतौदनां स्थालीं प्रक्षालयति नारी॥ पीतांबरं चक्रपाणिं पद्म नेत्रं हरिं यजेत्॥ एक ग्रामाः पांथाः आगताः संति॥ अयं वीर-पुरुषः ग्रामः॥ अत्र चारु भूषणाः मृग नयनाश्च स्त्रियः परि संरंति॥

पाठः४०

समासशब्दाः

अपुत्रः,	सपुत्रः,	सशिष्यः,
ससैन्यः,	अपत्रपः,	निर्जलः,
द्विपंचानि,	द्विदशाः,	दक्षिणपूर्वा,

वाक्यानि बहुव्रीहि समास घटितानि.

अपुत्रस्य गतिः नास्ति॥ सपुत्रः पिता आगतः॥ सशिष्यःगुरुः पूजितः॥ ससैन्यः शत्रुः पराजितः॥ अपत्रपं पुरुषं उपहसंतिलोकाः॥ मरुमार्गवत् निर्जलः अयंदेशः॥ रावणस्य द्विपंचानि सुरवाणि द्विदशाः भुजाः आसन्॥ पश्य दक्षिण पूर्वायां दिशि चंद्रः उदेति॥

पाठः४१

उपसर्गाः

प्र, परा, अप, सं, अनु, अव,
निस्, निर्, दुस्, दुर्, वि, आङ्
नि, अधि, अभि, प्रति, परि, उप,
अपि, अति, ...

वाक्यानिउपसर्ग घटितानि.

सरवं प्रजायते ॥ शत्रुः परा भवति ॥ वातः अप सरति ॥ इदं सं भवति ॥ सः अनु गच्छति ॥ तंडुलान् अव हंति ॥ जलं निस्सरति ॥ शब्दः नि र्गच्छति ॥ दुःखं दुस्सहं अस्ति ॥ वाक्यं दुर्बोधं अस्ति ॥ अर्थं विजानाति ॥ सूर्यः आ नंदति ॥ दुग्धं निपीय गतः ॥ वृक्षं अध्यास्ते ॥ गुरुं अभि वंदते ॥ मां प्रति पालय ॥ पुत्रं परि रक्षति माता ॥ गुरुं उपविशति छात्रः ॥ पात्रं अपि दधाति ॥ वेलां अति क्रामति ॥

पाठः४२

अव्यय शब्दाः

यथा,	तथा,	अन्यथा,	कदा,	यदा,	तदा,
कथं,	वृथा,	किं,	मुहुः,	पुनः,	यदि,
सद्यः,	पुरः,	अन्यत्रा,	नूनं,	अद्य,	श्वः,

वाक्यानि अव्यय घटितानि.

त्वं यथा वदसि तथा अहं करोमि ॥ सतु अन्यथा करोति ॥ कदा म
म माता आगमिष्यति ॥ यदा मेघ गर्जना जायते तदा वृष्टिः भवति
॥ मातरं विना कथं जीवति बालः ॥ त्वं वृथा बलं करोषि ॥ त्वं मम-
वाक्यं न शृणोषि किं ॥ मुहुः किं पृच्छसि ॥ अहं पुनः न वदामि ॥
यदि त्वं शीघ्रं आगच्छसि तर्हि तां दर्शयामि कुतुकं ॥ कृतस्य कर्म
णः सद्यः एव फलं भोक्ष्यसि ॥ त्वं अत्रतः गत्वा क्षणं मां प्रतीक्षस्व ॥
सः नूनं तव सखा भवितुं अर्हति ॥ अद्यवा श्वोवा वृष्टिर्भविष्यति ॥

पाठः ४२

अव्यय शब्दाः

शीघ्रं,	सत्वरं,	शनैः,	उच्चैः,	अलं,
सकृत्,	झटिति,	अजस्रं,	विना,	चेत्,
सपदि,	चिरं,	साकं,	सह,	संप्रति,

वाक्यानि अव्यय घटितानि.

शीघ्रं मे देहि पात्रीयं ॥ सत्वरं गच्छ तं ॥ शनैःपुस्तकं वाचय ॥ उच्चैः वद ॥ तव श्रमेण अलं ॥ सकृत् उक्तं न जानासि ॥ त्वया झटिति उक्तं ॥ अनेन तवकीर्तिः अजस्रं स्थास्यति ॥ जलं विना न जीवति मत्स्यः ॥ उद्योगं करिष्यसि चेत् सपदि फलं भविष्यति ॥ युवयोः युगपत् स्त्रीवं जातं ॥ नेन साकं भावद ॥ अहं त्वया सह यास्यामि ॥ संप्रति विद्यार्जनस्य समयः वर्तते ॥ मम भर्ता चिरं प्रवासिकः अस्ति ॥



पाठः ४४

अव्ययानि.

कर्तुं,	दातुं,	गृहीतुं,	स्थातुं,	गंतुं,	भवितुं,
भोक्तुं,	तरितुं,	जेतुं,	द्रष्टुं,	श्रोतुं,	ज्ञातुं,
स्तोतुं,	पातुं,	रक्षितुं,	उद्धर्तुं,	वक्तुं,	क्रीडितुं,

वाक्यानि अस्मय घटितानि.

तं दीनस्य मम पालनं कर्तुं अर्हसि॥ मह्यं जीवनं दातुं योग्यः असि॥ राज्य भारं गृहीतुं समर्थः अस्ति॥ अत्र स्थातुं न शक्नोमि॥ अहं गंतुं इच्छामि॥ त्वं राजा भवितुं अर्हसि॥ फलं भोक्तुं वांछति कन्या॥ सुखं तरितुं इच्छता नौका आश्रयणीया॥ मनः जेतुं शक्यं नास्ति॥ पुत्रं इष्टं इच्छति माता॥ गानं श्रोतुं इच्छति बाला॥ ग्रंथस्य तत्वं ज्ञातुं इच्छामि॥ त्वं आत्मानं स्तोतुं नार्हसि॥ क्षीरं पातुं इच्छति बालः॥ गाः रक्षितुं अर्हति गोपः॥ पतितं उद्धर्तुं वांछति साधुः॥ असत्यं वक्तुं कोपि नार्हति॥ बालः वयस्यैः सार्धं क्रीडितुं बहिः गतः॥

पाठः४५

अव्ययानि.

कृत्वा,	ज्ञात्वा,	श्रुत्का,	पीत्वा,	गत्वा,
दृष्ट्वा,	स्नात्वा,	धृत्वा,	श्रुत्वा,	स्थित्वा,
छित्वा,	दत्वा,	तीर्त्वा,	विदित्वा,	भूत्वा,

वाक्यानि अव्यय घटितानि.

कृत्वा दर्शयते प्राज्ञः ॥ ज्ञात्वा कर्म कर्तव्यं ॥ श्रुत्का व्रजनि पांथः॥ जलं पीत्वा गृहं गतः॥ गृहं गत्वा स्वस्थः भव ॥ पतिं दृष्ट्वा हर्षति-नारी ॥ नद्यां स्नात्वा गृहान् आगच्छत ॥ धैर्यं धृत्वा सभायां जल्पनि ॥ बालभाषणं श्रुत्वा माता जहास ॥ गंगा तीरे क्षणं स्थित्वा अग्रे जगाम ॥ शाखां कुठारेण छित्वा अपातयत् ॥ पुत्राय राज्यं दत्वा स्वयं वनं जगाम ॥ नदीं बाहुभ्यां तीर्त्वा पारंगतः॥ अर्थं विदित्वा तुतोष श्रोता ॥ ज्ञानी भूत्वा संसारं मुमोच ॥

पाठः४६

धातुरूपाणि.

धातु अर्थ.	वर्तमान.	भूत.	भविष्य.
भू, सत्तायां.	भवति.	बभूव.	भविष्यति.
दृध, धारणे.	दृधते.	देधे.	दधिष्यते.
स्पर्ध, संघर्षे.	स्पर्धते.	पस्पर्धे.	स्पर्धिष्यते.
वदि, अभिवादने.	वंदते.	ववंदे.	वंदिष्यते.
मुद, हर्षे.	मोदते.	मुमुदे.	मोदिष्यते.
दद, दाने.	ददते.	देदे.	दादिष्यते.
यती, प्रयत्ने.	यतते.	येते.	यतिष्यते.

वाक्यानि क्रियापद घटितानि.

दुःसंगे त्यक्त्वा सुखी भवति नरः॥ सः विजयी बभूव॥ तव कल्याणं भविष्यति॥ सैन्यपालः दंडं दधते॥ शुनकः सिंहेन सह स्पर्धते॥ गुरुं ववंदे शिष्यः॥ चिरागतं पुत्रं दृष्ट्वा माता मुमुदे॥ यदि पुत्रः पितरं वंदिष्यते तर्हि पिता मोदिष्यते॥ प्रजाभ्यः सुखं ददते राजा॥ सुखाय सर्वे यतंते॥ दुःखाय कोपि न यतिष्यते॥

पाठः४७

धातुरूपाणि.

धातु.	अर्थ.	वर्तमान.	भूत.	भविष्य.
शृंध,	शुद्धौ.	शृंधति.	शशृंध.	शोधिष्यति.
शंकि,	शंकायां.	शंकते.	शशंके.	शंकिष्यते.
त्वंगि,	कंपने.	त्वंगति.	तत्वंग.	त्वंगिष्यति.
लोचृ,	दर्शने.	लोचते.	लुलुचे.	लोचिष्यते.
भ्राजृ,	दीप्तौ.	भ्राजते.	बभ्राजे.	भ्राजिष्यते.
अर्च,	पूजायां.	अर्चति.	आनर्च.	अर्चिष्यति.
वांच्छि,	इच्छायां.	वांच्छति.	ववांच्छ.	वांछिष्यति.

वाक्यानि क्रियापद घटितानि.

देवदत्तः जलेन गात्रं शशृंध॥ चंद्रे दृश्यमाने कलंके भूच्छायं इति शंकते श्लोकः॥ हिमान्या शरीरं त्वंगते॥ कुमारी बहिःगत्वा चंद्रं लुलुचे॥ उदये रविः रश्मिभ्या भ्राजते॥ गृहागतं साधुं आनर्च गृही॥ ग्रामं ववांछ पांथः॥

पाठः ४८

धातुरूपाणि.

धातु	अर्थ.	वर्तमान.	भूत.	भविष्य.
व्रज,	गतौ.	व्रजति.	वव्राज.	व्रजिष्यति.
लुठि,	स्तेये.	लुंठति.	लुलुंठ.	लुंठिष्यति.
क्रीड,	विहारे.	क्रीडति.	चिक्रीड.	क्रीडिष्यति.
वेप्,	कंपने.	वेपते.	विवेपे.	वेपिष्यते.
चुबि,	चुंबने.	चुंबति.	चुचुंब.	चुंबिष्यति.
क्षमूष्,	सहने.	क्षमते.	च क्षमे.	क्षमिष्यते.
जल्प,	भाषणे.	जल्पति.	जजल्प.	जल्पिष्यति.

वाक्यानि क्रियापद घटितानि.

वृक्ष शोभां दृष्टुं आरामं व्रजंति लोकाः ॥ अहं अपि व्रजिष्यामि ॥ वने चोराः पथिकानां धनं लुलुंठुः ॥ बालकाः चत्वरे चिक्रीडुः ॥ भो राजन् तव संतापं श्रुत्वा अरि मंडलं वेपते ॥ पुत्रं चुचुंब माता ॥ भृत्यस्य अपराधं राजा चक्षमे ॥ सभायां जल्पंति पंडिताः ॥

पाठः४९

धातुरूपाणि.

धातु अर्थ.	वर्तमान.	भूत.	भविष्य.
फल, निष्पत्तौ.	फलति.	पफाल.	फलिष्यति.
जीव, प्राणने.	जीवति.	जिजीव.	जीविष्यति.
तक्ष्, तनूकरणे.	तक्षति.	ततक्ष.	तक्षिष्यति.
भिक्ष, याचने.	भिक्षते.	बिभिक्षे.	भिक्षिष्यते.
भाष, भाषणे.	भाषते.	बभाषे.	भाषिष्यते.
अस्क, अदने.	ग्रसते.	जग्रसे.	ग्रसिष्यते.
रक्ष, पालने.	रक्षति.	ररक्ष.	रक्षिष्यति.

वाक्यानि क्रियापद घटितानि.

यदि रूक वृष्टिः भविष्यति तर्हि धान्यं फलिष्यति॥ अन्नेन जीवंति जीवाः॥ तक्षा काष्ठानि तक्षति॥ भिक्षुः अन्नं भिक्षते॥ पतिं भाषते नारी॥ ओदनं ग्रसते बालः॥ सर्पः एकं जग्रसे॥ राजा लोकान् रक्षति॥ आत्मानं ररक्ष॥

पाठः५०

धातुरूपाणि.

धातु.	अर्थ.	वर्तमान.	भूत.	भविष्य.
कांसि,	ध्वनौ.	कांसति.	चकांस.	कांसिष्यति.
मह,	पूजायां.	महति.	ममाह.	महिष्यति.
रुच,	दीप्तौ अभिप्रीतौ च.	रोचते.	रुरुचे.	रोचिष्यते.
वृतु,	वर्तने.	वर्तते.	ववृते.	वर्तिष्यते.
वृधु,	वृद्धौ.	वर्द्धते.	ववृधे.	वर्द्धिष्यते.
स्यंदू,	प्रस्रवणे.	स्यंदते.	सस्यंदे.	स्यंदिष्यते.
मथ,	प्रख्याने.	मथते.	ममथे.	मथिष्यते.

वाक्यानि क्रियापद घटितानि.

तृषितः जलं कांसति ॥ क्षुधितः अन्नं चकांस ॥ सर्वेलोकाः धनं कांसंति ॥ पितरौ महति स्वपुत्रः ॥ दिवि रोचते द्युमणिः ॥ पशुः आज्ञया वर्तते नारी ॥ हे मंते शैत्यं वर्द्धते ॥ दंतीदानं मद स्यंदते ॥ लोके यदाः मथते ॥

पाठः ५१

धातुरूपाणि.

धातु. अर्थ.	वर्तमान.	भूत.	भविष्य.
त्वर, संभ्रमे.	त्वरते.	तत्वरे.	त्वरिष्यते.
राज्, दीप्तौ.	राजति-ते.	रराज-जे	राजिष्यति-ते.
रम्, क्रीडायां.	रमते.	रेमे.	रंस्यते.
पा, पाने.	पिबति.	पपौ.	पास्यति.
घ्रा, गंधोपादाने.	जिघ्रति.	जघ्रौ.	घ्रास्यति.
स्था, गतिनिवृत्तौ.	तिष्ठति.	तस्थौ.	स्थास्यति.
दा, दाने.	यच्छति.	ददौ.	दास्यति.

वाक्यानि क्रियापद घटितानि.

बत्सः पानाय मातरं गंतुं त्वरते ॥ अंतःपुरे ललनाभिः सह रमते रा
जा ॥ बालः स्तनं पपौ ॥ पुष्पं जिघ्रति कुमारी ॥ श्रांतः पांथः वृक्ष
च्छायायां तिष्ठति ॥ व्याघ्रं दृष्ट्वा तत्रैव तस्थौ सादी ॥ दीनेभ्यः धनंय
च्छति दाता नरः ॥ सिंहासने राजा विराजते ॥ आकाशे चंद्रः विरा
जते ॥

पाठः५२

धातुरूपाणि.

धातु.	अर्थ.	वर्तमान.	भूत.	भविष्य.
क्रुश,	आह्वाने.	क्रोशति.	चुक्रोश.	क्रोशिष्यति.
रुह,	प्रादुर्भावे.	रोहति.	रुरोह.	रोहिष्यति.
याचृ,	याञ्ञायां.	याचति-ते.	ययाच-चे.	याचिष्यति-ते
स्मिङ्,	ईषद्धसने.	स्मयते.	सिस्मिये.	स्मयिष्यति.
आङ्,	पाल	आयते.	तस्थे.	आस्यते.
लभे,	प्राप्तौ.	लभते.	लेभे.	लभिष्यते.
भज,	सेवायां.	भजति-ते	बभाज-जे भेजे.	भजिष्यति-ते.

वाक्यानि क्रियापद घटितानि.

भृत्यं क्रोशति भर्ता ॥ तटे वृक्षः रुरोहः ॥ विद्वान् राजानं धनं ययाच॥ वरं दृष्ट्वा वधूः सिस्मिये॥ साधुलोकं दुःखात् त्रायते॥ धनिकं गत्वा धनं लेभे भिक्षुः॥ औषधं भेजे रोगी॥ पतिं भजति नारी॥ सूनीस्था स्करं भजते लोकः॥

पाठः ५३

धातुरूपाणि.

धातु. अर्थ.	वर्तमान.	भूत.	भविष्य.
तप, संतापे.	तपति.	तताप.	तापिष्यति.
त्यज, हानौ.	त्यजति.	तत्याज.	त्याजिष्यति.
दृश, दंशने.	दृशति.	ददाश.	दर्शिष्यति.
दह, दाहे.	दहति.	ददाह.	दहिष्यति.
वस, निवासे.	वसति.	उवास.	वासिष्यति.
वे अ, तंतु संताने.	वयति-ते.	उवाय-ऊये.	वायिष्यति-ते
वद, वाचि.	वदति.	उवाद.	वादिष्यति.

वाक्यानि क्रियापद घटितानि.

तापसः तपः तपति ॥ सः वनं गत्वा देहं तत्याज ॥ सर्पः ददाश बालं ॥ अग्निः काष्ठानि दहिष्यति ॥ नगरेवसंति नागरिकाः ॥ पटं वयति तंतु वायः ॥ त्वं पठनं करिष्यसि सेत गुरुः त्वांसर्वं वादिष्यति ॥ यथा सः मां उवाद ॥

पाठः५४

साधारणानि वाक्यानि.

कुशलं ते विद्यते किं. मम कुशलमस्ति.अहं कुशली विद्ये.किमधि कं वृत्तं अस्ति. वृत्तं यथा पूर्वमेव:. वार्ता विशेषतो नवक्त्र्यास्ति. सांप्र तं त्वया किंक्रियते. त्वं किंकुर्वन्नसि. मया सांप्रतं विद्या भ्यासःक्रिय ते.अहं विद्याभ्यासं कुर्वन्नस्मि. कियदस्ति ते वयः. त्वद्वयसा तुल्यमे व अस्मद्वयः. यदि त्वमात्मनो जानासि वयः. कियतो भ्रातरो यूयं-स्थ. ममत्रयो भ्रातरः द्वे भगिन्यौ. एका भगिनी विवाहितास्ति. अ परा कुमारिका विद्यते. सा कुमार्यपि शालां गच्छति. त्वंशायनात् कदा उत्तिष्ठसि. अरुणोदये अहं शायनात् उत्तिष्ठामि. प्रथमं-व्यायामं कृत्वा पश्चात् गृहं अनुव्रजामि. व्यायामेन शरीरे आरोग्यं जायते.

पाठः ५५

साधारणानिवाक्यानि.

कालक्षेपं माकुरु. त्वं शालां गच्छ. गुरोः आज्ञया वर्तस्व. गुरोराज्ञा पालनीया. गुरुकृपया विद्यार्थी विद्वान् भवति. ममायं सहाध्यायी. अहं व्याकरणमधीये. किंवा मर्थं शास्त्रं पठसि? अयं गुरोरग्रे वक्तुं न बिभेति. अहं पितुः सकाशं स्थातुमपि न शक्नोमि. ममेदं पुस्तकं मया स्वयमेव लिखितं. इदं मम मषीपात्रं. इयं मे लेखनी. त्वं लेखनकर्मणि निपुणोसि. नताहमस्मि. एहि आवां बहिः पर्यटनाय गच्छावः. आरामं मवलोकयितुंच. ममापि वनशोभानिरीक्षणस्य कौतुकमस्ति.

पाठः५६

उत्थायोत्थाय बोद्धव्यं किमद्य सुकृतं कृतं ॥
दत्तं वादापितं वापि वाक्तत्या वापि भाषिता ॥ १॥
उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितं ॥
मरणव्याधिशोकानां किमद्य निपतिष्यति ॥ २॥
किंनु मे स्यादिदं कर्तुः किंनु मे स्याद कुर्वतः ॥
इति संचिंत्य कार्याणि धीरः कुर्वीत नित्यशः ॥ ३॥
पुरुषस्य व्यतीतोयः किंचिच्छुभ मकुर्वतः ॥
तमेव वंध्यं दिवसं विद्यादेव विचक्षणः ॥ ४ ॥
नजातु कामः कामाना मुपभोगेन शाम्यति ॥
हविषा कृष्णवर्त्मेव भूय एवाभि वर्द्धते ॥ ५॥
यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः॥
नालमेकस्य तत्सर्वं मन स्तोषाय जायते ॥ ६॥
यादृस्त्यजा दुर्मतिभि र्यानजी र्यति जीर्यतः॥
योऽसौ प्राणां तिको रोग स्तां तृष्णां त्यजतः सुखं॥७॥
यच्च काम सुखंलोके यच्च दिव्यं महत्सुखं ॥
तृष्णाक्षयसुख स्यैते नार्हतः षोडशीं कलां॥ ८॥
अवश्य मेव भोक्तव्यं कृतंकर्म शुभाशुभं ॥
तस्मात् शुभं प्रकर्तव्यं प्रयत्ने नाशुभं क्वचित्॥९॥

स्वधर्माचरणं नित्य मीश्वराराधनं तथा ॥ ॥
परोपकारश्चित्तस्य समाधानं सुखायवै ॥ १०॥

समाप्त

10250912

10250912

10250912



